International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 14-17
© 2021 IJSR
www.anantaajournal.com
Received: 11-05-2021
Accepted: 15-06-2021

**डा0 वीना विश्नोई शर्मा**
एसोसिएट प्रोफेसर, गुरुकुल कांगड़ी सम, वि0विद्यालय, हरिद्वार, उत्तर प्रदेश, भारत

**Corresponding Author:**
**डा0 वीना विश्नोई शर्मा**
एसोसिएट प्रोफेसर, गुरुकुल कांगड़ी सम, वि0विद्यालय, हरिद्वार, उत्तर प्रदेश, भारत

# अष्टांगयोगान्तर्गते यमानां पालनं तथा तस्य फलम्

## डा0 वीना विश्नोई शर्मा

**सारांशः –**
यदा साधकः मनसा वाचा कर्मणश्च अहिंसायां प्रतिष्ठितं भवति। तदा तेषां सान्निध्ये सर्वप्राणिनां वैर त्यागो भविष्यति। कदापि अन्य प्राणिभिः कष्टं न प्राप्तवान। अस्मिन् कार्ये सिद्धयार्थे सर्वप्रथम सर्वप्रकारेण सर्वविधिषु सर्वकालेषु सर्वत्रदेशेषु यदा अहिंसा जायते तदा साधकस्य सान्निध्ये यः हिंसकः प्राणि आगच्छति तदा तस्य वैर अवरुद्धं जातम्। त इमे अहिंसादयो यमाः देश–काल–जाति–समयानवच्छिन्नाः सार्वभौमाः सर्वावस्थास्वानुगतं महाव्रतमित्याख्यायन्ते।
अष्टांगयोगान्तर्गते यमानां पालनं तथा तस्य फलम्
अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। [1]

**कूट शब्द : –** अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य अपरिग्रह च सन्ति।

**प्रस्तावना**
अहिंसा विषये व्यास महाभागेन लिखितवान्– ''तत्रा हिंसा सर्वथा सर्वदा सर्वभूतानमभिद्रोहः ।'' अर्थात् मनसा वाचा कर्मणा सर्व काले तु सर्वप्राणिनां प्रकृतिः वैर त्यागः। यमनियमादि पालनार्थं अहिंसा अत्यावश्यकं प्रतीयते हिंसायाः प्रतिषेधार्थे वेदः अपि कथितम् '' मा हिंसी '' सर्वप्राणिनां कृते हिंसा त्यागेन सर्व मनुष्योचित व्यवहारम् अस्ति वेदे य कथितं तस्य पालनम् आवश्यकंक रणीय यतो हि –
वेदेन कथितम् –

> ''मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।''

सर्वाणि अहं मित्रवत् पश्यामि मित्रवत् समीक्षे। यदि वयं सर्वाणि प्राणिनां प्रति मैत्रीं कृत्वा शत्रुता त्यक्त्वा सस्नेहपूर्वकं वसामः तदैव क्लेषस्य समूलं नाशं जायते। अतः पृथिव्यां सवर्गस्य कल्पना साकारं भविष्यति यदि वयं मित्रवत् सर्वाणि भूतानि समीक्षे।
वेद सर्व सत्यविद्यानां पुस्तकम् अस्ति। अतः शाश्वत अहिंसामेव सत्यमस्ति, माहिंसी, वेदस्य आज्ञामस्ति।तथा वेद ईश्वरस्यवाणि अस्ति। अतः मनुष्योचितमस्ति यत् सर्व प्राणिनां कृते मैत्रीपूर्णं व्यवहारं स्थापयतु।
शाण्डिल्योपनिषदि आमुना प्रकारेण कथितम् –

> तत्रहिंसानाम मनोवाक् कार्य कर्मभिः सर्वभूतेषु सर्वदा क्लेशः जननम् [2]

अर्थात् हिंसा सर्व प्राणिनां हृदये क्लेषमेव उत्पन्नं करोति। अतः क्लेशस्य निवृत्यार्थं अहिंसायाः पालनंम् आचश्यकम् । अस्माकं सदैव अयमेव प्रयत्नं भवितुमर्हति यत्वयं कदापि कस्यापि कष्टं न दातव्यम्। प्राणिनां क्लेशितकरणस्यैव हिंसा भवति तथा संख शान्ति निर्भयतामेव वर्धनमहिंसा।
भगवान श्री कृष्ण महाभागेन कथितम् – अहिंसा दैवीससम्पत्तिमस्ति अस्मिन् विषये श्लोकं प्रस्तुतवान्–

> अहिंसा सत्यमक्रोधस्त्यागः शान्तिर्पैशुनम्। [3]
> दया भूतेष्व लोलुप्त्वं मार्दवं ह्रीरचापलम्।

तथा च अस्मिन् श्लोकस्य व्याख्यायामाचार्य शंकरः कथितवान् –

> अहिंसा अहिंसनं प्राणिनां पिड़ा वर्जनम्।

अहिंसाया तात्पर्यमस्ति हिंसा त्यागः। क्लेशस्य अत्यन्त अभाव मैत्री भावः वर्धनम् उत्साह जायते।महर्षि मनु महाभागः अष्टधा हिंसकस्य वर्णन कृतवान्

अनुमन्ता निशसित निहन्त कय विक्रयी।[4]
संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः।।

गोकरुनानिधि महर्षि पतंजलिना हिंसायां विविधाः प्रकाराः उद्धतं कृतम् –

नितर्का हिंसादयः कृतकारितानुमोदिता कोधलोभमोहपूर्वका।[5]
मृदुमध्यादिमात्रा दुखाज्ञानान्त फना इति प्रतिपक्षभावनम्।।

अर्थात् यमनियमानां प्रतिरोधः वितर्क यथा अहिंसाया वितर्क हिंसा भवति। सत्यस्य असत्य, अस्तेयस्य स्तेयः इत्यादयः।

**हिंसायां प्रकाराः –**
प्रथमं कृतः कारिताः अनुमोदितश्च। पुनः हिंसा कथं उत्पद्यते तेषां कारणानां कथितम्– क्रोधलोभः मोहपूर्वकश्च। पुनः कार्यश्च स्तरमपि कथित् – मृदुः मध्याः अभिमात्रः अर्थात् तीव्रश्च। अस्मिन् प्रकारेण हिंसायां एकाशीति भेदाःउपभेदाः सन्ति।

**अहिंसाया फलम्–**
अस्मिन् विषये महर्षि पतंजलि मुनिना कथितम् –

''अहिंसा प्रतिष्ठायां तत्सन्निधौ वैरत्यागः''[6]

यदा साधकः मनसा वाचा कर्मणश्च अहिंसायां प्रतिष्ठितं भवति। तदा तेषां सान्निध्ये सर्वप्राणिनां वैर त्यागो भविष्यति। कदापि अन्य प्राणिभिः कष्टं न प्राप्तवान। अस्मिन् कार्ये सिद्धयार्थी सर्वप्रथम सर्वप्रकारेण सर्वविधिषु सर्वकालेषु सर्वत्रदेशेषु यदा अहिंसा जायते तदा साधकस्य सान्निध्ये यः हिंसकः प्राणि आगच्छतितदा तस्य वैर अवरुद्धं जातम्।
अयमेव फलं अहिंसा प्रतिष्ठायांप्राप्तवान् । अहिंसा व्रत पालनेन उपासकः महानः कीर्तिवान्, पशुवान् ऐश्वर्यवान् च भवति।[7] तस्य साधनायामपि गति भवति। अहिंसेयै स्वोन्नति परोन्नति देशहितं परहितं विश्वहितं च सम्भाव्यते। यमनियमपालनात् नचिकेता परब्रह्मस्वरुपं प्राप्य मृत्युंजयः बभूवः ।[8] आध्यात्मयोगान्तरगते अहिंसयेव ब्रह्मज्ञानं भवति। तेन ज्ञानेन जीवात्मा ब्रह्मलोक व्रजति।[9]

**सत्य –**
सते हितम् । सत् यत् इति निर्वचनकृते सत्य शब्द सिद्धयति। सत्यप्रिया देवा असत्यप्रिया मनुष्याः। सत्य सामर्थात् परमेश्वर साक्षात्कारस्य मोक्षस्य यद् द्वारं वर्तते तत् स्वर्णमयेव प्रलोभनेन धनेवा अन्तर्हितम्। उपासकः देवः द्वारस्याच्छादनं अपसारर्थं हृदि–

न हि सत्यात् परो धर्मः

यदा उपासकः ब्रह्मज्ञानाय प्रयत्नं करोति तदा स पश्यति यद् ब्रह्मैक सत्यम्। दसान्नदेनापि सत्यस्य परिभाषायामुक्तम् – यस्य कदाचित् विनाशो न भवेत् तत्सत्यम्। सत्यस्य लोपो कदापि कः अपि न कर्तुं समर्थः। एतदर्थं परमेश्वरमपि सत्यमुच्यते यतः ईश्वर अविनाशी रुपेण त्रिषु कालेषु विद्यते। यो मनुष्य अस्मिन् जन्मनि परमेश्वरं न जानाति, नैवं ज्ञातुं प्रयत्नं करोति तस्य जीवनं व्यर्थमेव। अतः एव सत्पुरुषः आत्मानं ज्ञात्वा अस्मात् लोकात् शरीं निर्मुच्यमुक्ता आनन्दमया भवन्ति। पंचमहायज्ञविधि दयानन्द अस्मादेवकारणात् यमाचार्यः कठोपनिषदि नचिकेता जिज्ञासुमुपदिदेश –

इहचेदवेदिथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टि।[10]

अस्मिन् मनुष्य शरीरे जीव ब्रह्मभेदेन द्वात्मानौ वर्तते। तयोरेव जीवः स्वकर्मानुसारेण पापपुण्य फले सुखदुखे भुंक्तः अन्यः परमेश्वर सुखदुख रहिता साक्षिरुपो सर्वदा जीवस्य कर्म फलानि भवन्ति। जीव करोति परमात्मा कारयति यदि जीव संसार मध्ये ऋतं सत्यन्च पिबति अर्थात् आचरति तदा तु स ब्रह्मविद भूत्वा श्रेयपथं गृहीत्वा ब्रह्मलोक प्राप्नोति, किन्तु यदि सत्यविहिनं भूत्वा प्रेयपथं ग्राहयति तदा दुखसागरे निगमन्ति। [11] तैत्तिरयोपनिषदः गुरुदक्षिणा प्रसंगे शिक्षावल्यमेव उपाध्यायः अभिवदति सत्यं वदः, धर्मं चरः आद्यादयः। [12] लोकव्यवहारः अपि सत्यस्यवैशिष्ट्यम्। यो मनुष्य सत्यं वदति तस्योपरि शत्रवः अपि विश्वसन्ति। मिथ्यावादि मनुष्योपरि मित्राणि अपि न विश्वसन्ति। लोके ईश्वरप्राप्तयेश्च सत्यस्य अनिर्वचनीयं महत्वम्। अतः एव ब्रह्मविदां कथनम् –

सत्यं ज्ञानमननतं ब्रह्म। [13]

सत्यादिभिः सम्बन्ध्यमाने ब्रह्म, अनृतादिभिः न कदाचित् लभ्यते। छान्दोग्योपनिषदि एकस्मिन् प्रसंगे प्रजापतिः उवाच यः परमात्मा शुक्रे शुद्धं, अपापविद्धं, जरामरणादिदोषरहितं, अपिपासः, सत्यकामः, सत्यसंकल्पाः सः अन्वेष्टव्यः सैव विजिज्ञासितव्यः। [14]

तमसोमाज्योतिर्गमय । असतोमासद्गमय।
मृत्यौः मा अमृत ंगमयति। [15]

सत्येन धर्म वर्धते। यो मनुष्य सत्यं वदति सः धर्मं ब्रूते , यो धर्मं वदति स सत्यं भाषते तस्माद् हेतोः सर्वदा सत्यं वक्तव्यम्। आचार्य स्वशिष्यान् उपदिशथ्नत यत् सत्यं वद धर्मं चरेति अग्र पृच्छति पुनः सत्यं कस्मिन् प्रतिष्ठितम् [16] हृदयेश प्रतिष्ठितं भवति। यतो हि हृदयनैव सत्यं जानाति। सर्वं व्रतं सत्यप्रतिष्ठितं गायत्री मन्त्रः अपि सत्यं प्रतिष्ठितम्। चक्षु वै सत्यम्। बुद्धि जनाः प्रत्यक्षं सत्यं वदन्ति इति। अतः सत्यज्ञान कर्मोपासनेन तपः अनुष्ठानेन च सर्वं पश्यन्तमनुपश्यति।
उपनिषदसु अपि अमुनाप्रकारेणेव कथितम्–

सत्यं ज्ञानानन्देन च परिपूर्ण अनन्त ब्रह्म मन्यते ''सत्यं ज्ञानमनन्त ब्रह्म'' [17]
अग्रे कथितः – ''सत्यमविनाशी नामदेशकालवस्तुनिमित्तेषु विनश्यत्सु,
यन्न विनश्यत्यविनाशितम्।सत्यमित्युच्यते। [18]

अर्थात् सत्य त्रिषु कालेषु सम्भवति। सैव सत्यं सर्वेषां कल्याणं करोति, वक्ता श्रोताश्च भवसागरात् तरन्ति।

**सत्यस्य फलम्** –
''सत्यप्रतिष्ठायां कियाफलाश्रयात्वम्'' [19] यदा साधकः मनसा वचंसा कर्मणा पूर्णरुपेण सत्यमेव प्रतिष्ठितं तदा साधकः येषं पुण्यकार्याणां कर्तुं इच्छति तेषां सर्वाणि कार्याणि सफलं भवति। साधकं फलं प्राप्नोति यत् यः मनुष्यः अधार्मिकास्ति तस्य कृते यदि कथ्यति'' धार्मिको भूया ''तु सः मनुष्यः धार्मिकतां प्राप्नोति। तस्मिन्नेव प्रकारेण यदि कथ्यति त्वं'' स्वर्गं प्राप्नुहिति'' तु स्वर्गं प्राप्नोति। अस्मिन् प्रकारेणन साधका ''अमोघ वाग्भवति''। [20]
डपनिषदस्येमतानुसारेण सत्येन आत्मज्ञानरुपी फलं प्राप्नोति। सत्येन तपः लभ्यते तपात् आत्म विजानिमः तथा च सत्येन जपं प्राप्नोति, सत्येन शुभ्रमार्गं प्राप्नोति, अस्मिन् मार्गेण तत्वज्ञः ब्रह्म प्राप्नोति। सत्येन अन्तः शरीरे यः शुभ्र ज्योतिर्भवति तेषां प्श्यन्ति ब्राह्मणः इदं मुण्डकोपनिषदस्य वर्णनमस्ति –

सत्येन लभ्यस्तपसा हयेष आत्मा सम्यग् ज्ञानेन ब्रह्मचर्येण नित्यम्। [21]
अन्तःशरीरे ज्योर्तिमयोहि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः।।
सत्यमेव जयति नानृतं सत्येन पन्था वितो देवयानः।

येना क्रमन्त्यृषयो ह्याप्तमाया यत्र तत् सत्यस्य परं निधानम्।।

**अस्तेय –**

अस्तेयस्य अवगमनात् पूर्वं स्तेयस्य ज्ञानम् आवश्यकम् एतादृश्मिव महर्षिव्यासेन प्रयन्तं कृतं यत्' स्तेय शास्त्रपूर्वकमत्याग्र परतः अवगमनाय स्वीकरणम्। तत्वनिषधः पुनरस्पृहारूपमस्तेयमिति । यथा अन्यस्य वस्तु शास्त्रात् विरुद्ध नियमेन स्वीकरणं स्तेयमस्ति। यतोहि अन्यस्य वस्तुनि उपरि स्वस्य अधिकार स्थापनीयम् व अन्यस्य वस्तु स्वस्य चिन्तनीयम् स्तेय इति कथ्यते। एतादृशि स्तेयस्य त्यागमेव अस्तेयः।

वशिष्ठसंहितायाम् अस्तेयस्य परिभाषा कृतमेव कथितम् अस्ति यत् 'सर्वेषु द्रव्येषु किया मन एवं वाणितः निःस्पृह भवितव्यमेव अस्तेयः' ।कस्यपि धनं बलात् स्वीकरणं स्तेय एवं एतस्य न्यूवता एव अस्तेयः । मिथ्या भाषणेन लोभ दर्शयित्वा कस्यपि अथ ग्रहणकरणं पापस्य श्रेण्याम् आगच्छति ''स्तेय पर स्वापहरणं तदभावः अस्तेयम्।[22] जाबालोपनिषदानुसारेण परधनं ऐश्वर्यं पररत्नानि स्वर्ण इत्यादयः किमपि लघु दीर्घ वस्तुनि प्रतिगमनात् अनात्म बुद्धया आत्मातः भिन्न चिन्तनं विद्वत्जनेन अस्तेयमेवकथितम्।[23]

शांडिल्योपनिषदानुसारेण मनसा वाचा कर्मणा पर वस्तुनि विषयेन चिन्तनम् अस्तेयमेव। ईशोपनिषदे अपि कथितम् अस्ति यतः मागृधः कस्यस्विदधनम्।[24] कस्यापि परार्थस्य तृष्णा मा स्थापनियं परवस्तुन्या तृष्णा चोरणमेव तद् प्रकटितं वा अप्रकटितं कस्यापि रुपेण मा भवेत् तादेव अस्तेयमिति। इत्यस्य पालनं प्रत्येकस्तिन् सामाजिक जनानां कृते आवश्यकमस्ति एतद् वेदविहित मार्गम्। पूर्णरुपेण मनसा वाचा कर्मणा परपदार्थस्य तृष्णा त्यागमिति अस्तेयम्। एवं एतदेव मानवस्य स्वाभाविक धर्म अस्ति अस्तेयस्य ण्तस्मिन् स्वरुपस्य वर्णनं सर्वेषु वैदिक एवं लौकिक साहित्येषु प्राप्नोति।

अतः अस्माभिः स्वधर्मप्रवृत्या अवश्यमेव पालनं करणीयम्। उचितमनुचितं ग्रहणश्त्यागे सुखदुखं फलं प्राप्नोति।

**अस्तेय पालनस्य फलम् –**

अधुना सर्वप्रथमं प्रश्नम् आगच्छति यत् अस्तेय पालनस्य लाभ किम् अस्ति ? एतस्मिन् विषये महर्षि पतंजलि महोदयेन कथितं यत् '' अस्तेय प्रतिष्ठायां सर्वरत्नोपस्थानम् '' अस्तेय मनसा वाचा कर्मणा पालन करणमेव सर्वाणि रत्नानि प्राप्तयन्ते। [25]

अस्मिन् महर्षि व्यासेन कथितं यत् सर्वादिक्स्थान्यस्योपतिष्ठनते रत्नानि '' योगी जनानां कृते चत्वारि दिशासु उत्तमोत्तम द्रव्येषु प्राप्तिर्भवति। यो साधका अस्तेयस्य पालनं करोति तस्य पार्श्वे कदापि कस्यापि पदार्थस्य अभावं न भवति कारणं तस्य पार्श्वे चतुर्शु दिशासु रत्न प्राप्ति अभीष्टस्य प्राप्तिर्भवति। एतदप्रकारेण तस्मिन् अस्तेयस्य पालक येगीषु परम पुरुष परमात्मस्य कृपादृष्ट्या वैशिष्ट्यं भवति। एवंत स्मिनृ सर्वज्ञस्य कृपामात्रेण अन्य किमपि आवश्यकं न भवति।

एवं भोजवृत्तिमतानुसारं–

> ''अस्तेयं यदा अभ्यस्याति तदा अस्य तत्प्रर्षनिन्राभिलाषस्यषि। सर्वतो दिव्यानिरत्नानि उपतिष्ठन्ते।'' [26]
>
> अतः दिव्यानिरत्नानि सहमेव परमात्मकृपा दृष्ट्या दिव्यसुखस्य प्राप्ति अस्तयस्य पालनफलमेव भवति।

**ब्रह्मचर्य –**

ब्रह्मचर्ये शब्द द्वयमेव 'ब्रह्म एवं चर्य' शब्दयो मेलनं भवति अर्थात् ब्रह्म विचरणम्।

ब्रह्मचर्य रूाब्द अनेकार्थे प्रयुक्तवान् – यथा ब्रह्म–वेदः, चर्य – अध्ययनम्, ब्रह्म – विद्या, चर्य– संचयः, ब्रह्म – ईश्वर, चर्य – उपासना, ब्रह्म – वीर्य, चर्य – रक्षणम् । ब्रह्मचर्यस्य इत्यस्मिन् प्रकारा अनेकार्था भवन्ति। ब्रह्मे विचरण कर्तुं शक्नुयात् सः ब्रह्मचारी। ब्रह्मचारी एव ब्रह्मचर्यस्य धारकः भवितुमर्हति। ब्रह्मचर्यस्य महर्षि व्यासेन कथितमस्ति ''ब्रह्मचर्य गुप्तेन्द्रियस्योपस्थस्य संयमः '' गुप्तेन्द्रियस्य संयमे ब्रह्मचर्य अस्ति। ब्रह्मचर्यस्य विषये महर्षि दयानन्द सरस्वती कथितवान् – '' ब्रह्मचारी वेदे चरितुं शीलं यस्य सः ब्रह्मचारी । ऋग्वेदादिभाष्यभूमिका उपासना विषयः वेदानंकूल आचरणं करणमेव ब्रह्मचर्य। ब्रह्मचर्येन एव महानतम ब्रह्मतत्व प्राप्तिर्भवति। तस्य एव प्राप्ति कृते ब्रह्मचर्यस्य अनुष्ठानं क्रियते। [27]

शाण्डिल्योपनिषदि अपि कथितमस्ति ' ब्रह्मचर्य नाम सर्व अवस्थासु मनो वाक् काय कर्मभिः सर्वत्र मैथुन त्यागः '' [28] सर्वासु अवस्थासु मानसिक, वाचिक शरीरेण उद्घटितं तृष्णायां मैग्नि त्यागमेव ब्रह्मचर्यं कथितम्। अत्र योगदर्शनस्य भाष्ये राजवीर शास्त्री महोदयेन कथितम् यत् ब्रह्चर्यस्य पालनं कथं करणीयम् ? यः कामवासनाः उत्तेजितं कुर्वन्ति ते व्यवीारः तेषं त्यागः यथा एकान्त सेवनस्य त्यागः, अश्लील पुस्तकानां उपन्यासानां पठनं कदापि नैव करणीयम्, विवाहोपरान्त ऋतुगामी भवेत् सैव ब्रह्मचारी स्यात्। वीर्यमेव अरूमाकं भोजनस्य अन्तिम अवस्थामस्ति। रसरक्तमेदमांसमज्जा अस्थ्यः तत्पश्चात् वीर्यस्य निर्माणं जातम् । अतः वीर्यमेव भोजनस्य सार तत्वमस्ति। पूर्व शास्त्रेषु कथितम्– ''बिन्दु धारणात् इन्द्रिय जयः इन्द्रिय जयात् सर्वकामना फलितम्''। महर्षि दयानन्दमहाभागेन सत्यार्थप्रकाशे लिखितम् – यः मनुष्याः ब्रह्मचर्यं धृत्वा तस्य नाशं न कुर्वन्ति ते मनुष्याः सर्वाणि रोगाणि त्यक्त्वा धर्मार्थकाममोक्षाणां प्राप्नोति। अतः ब्रह्मचर्यस्य पालनं पुरुषार्थचतुष्ट्यं प्राप्ति कारयति।[29] ब्रह्मचर्यस्यविषये अथर्ववेदेन कथितम् –

ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति। अर्थात् तप माध्यमेन यः राजा ब्रह्मे विचरणं करोति सः राजा एव राष्ट्रस्य रक्षा,पालनं, पोषणं कर्तुं समर्था भवितुमर्हति। ब्रह्मचर्येण राजा राष्ट्रस्य पूर्णविकासं कर्तुं समर्था भवितुं शक्नोति।

**ब्रह्मचर्यस्य पालनं फलम् –**

अस्मिन् विषये महर्षि पतंजलिना कथितमस्ति यत् –

'' ब्रह्मचर्य प्रतिष्ठायां वीर्य लाभः '' [30] अर्थात् साधकः मनसा वाचा कर्मणा पूर्णरुपेण ब्रह्मचर्यस्य पालनं करोति तदा वीर्यं, सत्वं अखण्डशक्तिलाभं प्राप्नोति। अनन्त शक्ति स्वरुप अर्थात् ओजस्य मूलस्वरुपमेव वीर्यस्य प्राप्ति भवति एवं एतस्मिन् शक्त्या एव मनोनिग्रह भवति। इन्द्रियाणां विजयप्राप्ति एवं एतस्य साधकस्य पूर्ण कामना भवति एवं च पितामह भीष्म , स्वामी दयानन्द सरस्वती सदृशमेव साधकः मृत्योपरी विजयं प्राप्नुयात्। वेदेषु अपि कथितमः '' ब्रह्मचर्येण तपसा देवा मुत्युमुपाघ्नतः। [31]

महर्षि व्यासमहाभागः उक्तवान्–

''यस्य लाभादप्रतिधान्गुणानुत्कर्षयति।'' अतः ब्रह्मचारी साधकः शिष्येषु ज्ञानमाधातुं समर्थोभवति इति योगतत्वोपनिषदि कथितम्–

> योगीनः अंगे सुगन्धश्च जायते बिन्दु धारणात्। [32]
>
> अर्थात् वीर्य संयमात् योगीनः अंगेसुष्टु गन्धः उत्पद्यते।

महर्षि मनुना मतानुसारेण ब्रह्मचर्यस्य पालनं मोक्षसाधकं भवति। ब्रह्मचर्य पालने आचार्य शिष्येषु ज्ञानज्योति प्रज्जवलितं कर्तुं समर्थो भवति। अस्मिन् विषये वेदे प्रमाणमस्ति–

> आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते।

अर्थात् ब्रह्मचर्येण अस्मिन् लोके सर्वं सिद्धयति। उपनिषसु कथितमस्ति – तद् एवैतं ब्रह्मलोकं ब्रह्मचर्येणं विन्दन्ति तथा च ब्रह्मचर्येण विद्या, श्रद्धा, सूर्यलोकं च ब्रह्मलोकं प्राप्नोति।

**अपरिग्रह –**

अपरिग्रहा पूर्वं परिग्रहस्य ज्ञानम् आवश्यकं प्रतीयते तदैव अपरिग्रहस्य सुस्पष्टं रुपं जातम्। परिग्रहस्य कः अभिप्रायः? वस्तुनां

अनावश्यकरुपेण संग्रहेव परिग्रहम्। परि–परितः , सर्वतः , ग्रह–ग्रहणम् । अर्थात् परितः द्रव्यानां लोभ मोह क्रोधेभिः संग्रहेवपरिग्रहः। पुनः अपरिग्रह – 'अ' इति उपसर्ग नकारात्मकं प्रतीयते। अनावश्यकं द्रव्यानां संग्रहवृत्याः त्यागं अपरिग्रहम्।
अस्मिन् विषये महर्षि व्यास महाभागेन कथितम् –

> ''विषयाणामर्जन रक्षण क्षय संग हिंसा,
> दोषदर्शनादस्वीकरणमपरिग्रह इत्येते यमाः।'' [33]

अर्थात् विषमार्थं पदार्थानां अर्जने, रक्षणे, क्षये, संगेषु हिंसा दोष दर्शनाद् स्वीकरणमेव अपरिग्रहः। अतः पदार्थानां त्यागपर्वक उपभोगेन अपरिग्रहं सिध्यति।

अस्मिन् विषये ईशोपेनिषदे लिखितवान्–

> ''तेन त्यक्तेन भुन्जीथाः मा गृधः कस्यस्विद्धनम् ''।[34]

अस्मिन् संसारे सर्व पदार्थाः परमेश्वरेण प्रदत्ताःअस्ति। तेन त्यागपूर्वकम् उपभुज्यः। कस्यापि धनस्य लालसां मा कुरुः। यतो हि इदं धनं कस्यापि न भवति। अग्रे वेदेन कथितम्– नान्याः पन्था विद्यतेयनाय। अतः त्यागपूर्वकं भोगात्भिन्नः अन्य कः अपि मार्गं शेषो नास्ति येन मोक्ष फलं प्राप्नोति। अतः सुख शान्ति आनन्दस्य वर्धनाय अपरिग्रहस्य पालनं अवश्यं करणीयम्। यतो हि – जीवनयात्रामतिरिक्तं भोग साधनानां स्वीकरणं तेषां अस्वीकरणमेव अपरिग्रहः। कठोपनिषदि वाजश्रवसः सर्वधनंमोक्षकामनया–अपरिग्रहस्य इच्छायाक्त्वंगदक्षिणारुपं दत्तवान् । तत्रैव कथितम् – न वित्तेन तर्पणीयो मनुष्यः ।[35] कठो0 1/17अतएव ईश्वरोपासकः प्रार्थयते –

> अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।[36]
> युयोध्यस्मद्जुहुराणमेनो भूयिष्ठान्ते नमः उक्तिं विधेम।।

हे प्रकाश स्वरुप परमेश्वर ! अस्मान् शोभनेनसरलेन अपरिग्रहमार्गेण चालयन्। वयं उपासकाः श्रद्धया प्रीत्या च ते नमस्कारवचनं कुर्मः। योगदर्शनस्य सूत्रार्थेः महर्षि दयानन्देन अपि कृतम्–
उपासकः कं प्रति वैरं न कुर्यात् सर्वदा सत्य वदेत् मिथ्या भाषणं नैव कुर्यात् स्तेय न कुर्यात् जितेन्द्रिय भूत्वा निरभिमानी भवेत् इत्यते यमाः।

**अपग्रिहस्य फलम् –**

> ''अपरिग्रहपालनेन अन्तःकरणस्य शुद्धिर्भवति''

अपरिग्रहव्रतधारी इह लोके धर्मानुष्ठानेन अमरत्वं प्राप्नोति। तस्य अभिमानं क्षीयते। योगदर्शनं पतंजलि मुनिना अपरिग्रहफलमुच्यते –

> ''अपरिग्रहस्थैर्ये जन्म कथन्तासम्बोधः'' [37]

अपरिग्रह पालनेन साधकः जन्मनः कारणानि जानाति। यतः कः अस्मिन् केन कारणेन अहं जन्म मरणव्यूहे पतितम् ? पुनर्जन्मनि अहं किं भविष्यामि ? मम स्वरुपं किं भविष्यति? शरीर संयोगाय किं कारणं वर्तते? कदा शरीरस्य वियोगो भवष्यति इति विचारयति।
अस्मिन् खलु योगदर्शने महर्षि व्यासेन उक्तम– कः अहमासम, कथमध्यासम, किं स्विदिदम्, कथं स्विदिदम्, के वा भविष्यामः इत्येवमास्य पूर्वान्त परान्तमध्येष्वात्मभावजिज्ञासा स्वरुपेणोपावर्तते। एता यमस्थैर्ये सिद्धयः। अर्थात् अपरिग्रहस्य वृत्तस्य फलम् इदं कथ्यते यत् – जन्मनः कारणानि योगी पुरुष एव जानाति । ऋग्वेदादिभाष्यभूमिकायामुपासना विषये स्वामी दयानन्देन अपरिग्रहं प्रतिपाद्यते। शुभ गुणानां प्रतिष्ठा साधक मनसि स्थिरतां दृढ़यति। अहं स्वश्रद्धया भक्त्या प्रत्यायत्र परमात्मानं प्राप्स्यामि। इत्येव सः आत्मानं प्राप्नोति। अपरिग्रह व्रत पालनेन साधकस्य मिथ्याभिमानं नश्यति। [38]
त इमे अहिंसादयो यमाः देश–काल–जाति–समयानवच्छिन्नाः सार्वभौमाः सर्वावस्थास्वानुगतं महाव्रतमित्याख्यायन्ते। तत्र तावद्देशा अवच्छिन्ना यथा तीर्थे न हनिष्यति। काला अवच्छिन्ना यथा चतुर्दश्यां पुण्ये अहनि न हनिष्यति। जात्यवच्छिन्ना यथा मत्स्यवधकस्य मत्स्येष्वेव हिंसाप्रवृत्तिर्नान्यत्र। समयावच्छिन्ना यथा क्षत्रियाणां युद्ध एव हिंसा ना अन्यत्रेति। तैः सर्वैवच्छिन्ना सार्वभौमा अहिंसा अनुष्ठेयैव मुमुक्षुभिः सर्वात्मनेति।

**संदर्भ सूची**


1. योग दर्शन 2/30
2. शाण्डिल्य उपषिद 1/1
3. गीता 16/2
4. मनुस्मृतौ 5/51
5. गोकरुनानिधि महर्षि पतंजलिना
6. योगदर्शन 2/35
7. छान्दोग्योपनिषदि 2/11
8. कठोपनिषदि 2/3/18
9. कठोपनिषदि 2/2/18
10. कठोपनिषदि 2/5
11. मुण्डकोपनिषदि 3/1/1
12. तैत्तीरियोपनिषदि 11/1
13. तैत्तीरियोपनिषदि 1/1
14. छान्दोग्योपनिषदि 8/7/1
15. छान्दोग्योपनिषदि 1/4/14
16. व्हदारण्यकोपनिषदि 3/23
17. तैत्तीरियोपनिषदि 2/1/1
18. सर्वसारोपनिषद 3
19. योगदर्शन 2/36
20. सर्वसारोपनिषदि 1/36
21. मुण्डकोपनिषदि 3/2/2
22. वशिष्ठ संहिता , भोजवृत्ति 228
23. जाबालोपनिषदि 1/11
24. ईशावास्योपनिषदि 1/1
25. योगदर्शन 2/37
26. भोजवृत्ति 229
27. ऋग्वेदादिभूमिका उपासना प्रसंगे
28. शाण्डिल्योपनिषदि 1/3
29. सत्यार्थप्रकाशे तृतीयसमुल्लासे
30. योगदर्शन 2/38
31. अथर्ववेदे 1/5/19
32. योगतत्वोपनिषदि
33. योगदर्शन व्यासभाष्ये 2/30
34. ईशावास्योपनिषदि 1
35. कठोपनिषदि 1/17
36. ईशावास्योनिषदि 18
37. योगदर्शन 2/39
38. ऋग्वेदादिभाष्याभूमिका उपासना विषये